# Shivarahasyadvadashamshan Pathamahima

# શિવરહસ્યદ્વાદશાંશાન્ પાઠમહિમા

## Document Information

Text title : Shivarahasyadvadashamshan Pathamahima

File name : shivarahasyadvAdashAMshAnpAThamahimA.itx

Category : shiva, shivarahasya, dvAdasha

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 11 - jaigIShavyaskandasaMvAde dvAdashAMshasaNkhyAkathanam | 65-73||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# શિવરહસ્યદ્વાદશાંશાન્ પાઠમહિમા

- શિવરહસ્યે જૈગીષવ્યસ્કન્દસંવાદે -
જગાદ જગતાં ગુરુસ્ત્રિજગતાં જનિત્રીં
મુદા જગત્રિતયજન્તુહૃત્ત્રિવિધતાપદુઃખાપહમ્ ।
જડાજડગતસ્થિતિપ્રલયભાવભાવં ભવં
વિશોષયદિદમ્સુહુશ્શિવરહસ્યરત્નાંશુમાન્ ॥ ૬૫॥

તદેવ ભવતાં વદે ભવદવાગ્નિસંશોષકં
વિધુન્તુદમુખોત્થિતપ્રકટસોમધામપ્રભમ્ ।
વિકાસિતદિશામુખપ્રથિતપાણ્ડિમાનોપમં
સુધામપિ બુધાઃ પરં હવનવક્ત્રહવ્યાશનાઃ ॥ ૬૬॥

વિધૂય સુરલોકગાઃ પરિપઠન્તિ શમ્ભોઃ
કથામથજનનાથ તે પ્રમથનાથ નાથોઽસ્મ્યહમ્ ।
ગિરીન્દ્રવરકન્યકાહૃદયનાથ પાદામ્બુજં
મનોરથપથાતિગં પ્રથય ભક્તિભાવં ત્વયિ ॥ ૬૭॥

ક્ષમારથરથાઙ્ગકસ્સ્ફુટસુપાણિબાણાસનો
હિરણ્યનગકાર્મુકસ્સકલવિશ્વનાથાધુના ।
સ એવ સુખસમ્પદાન્નિધિરપારપુણ્યાસ્પદસ્સ
એવ સુકૃતી સદા યજતિ વેદમધ્યેતિ ચ ॥ ૬૮॥

સ દાનનિચયાર્જિતપ્રભવધર્મસારાધિકસ્સ
ઉત્તમસસાગરાવસન ઉર્વરાદાનકૃત્ ।
ક્ષણાર્દ્ધમધિકાદરશ્શિવરહસ્યધર્મશ્વાસ્સ
એવ ગણનાયકશ્શિવપદાબ્જયુગ્માર્ચકઃ ॥ ૬૯॥

સુરાસુરચરાચરપ્રભવનાશરક્ષાક્રમૈઃ
નવાયુતરણાઙ્ગણપ્રભવયુદ્ધદુઃખોદ્ભવૈઃ ।
શ્રમૈકરસધૂર્ગતૈર્વિવિધવર્ણધરમાશ્રમૈઃ

કથાભિરિહ નશ્વરં ન ભવતિ શ્રુતીશેખરમ્ ॥ ૭૦॥

તષાદ્રિરભિખણ્ડનૈઃ કિમિહ લભ્યતે તણ્ડુલસ્તથા
શિવકથાં વિના ન હિ શમાય જન્તોર્મનઃ ।
શૈવાનન્દરહસ્યસાગરમહાદ્વીપોપમા દ્વાદશાસ્તે
ચાંશાઃ ખલુ શઙ્કરેણ વિહિતા નામાનિ તેષાં વદે ॥ ૭૧॥

માહેશઃ પ્રથમસ્તતોઽપિ હિ ભવો હારશ્ચતુર્થેશ્શિવોભર્ગઃ
શઙ્કર ઉગ્રો ભીમસદાશિવેશ્વરમહાદેવેશસઞ્જ્ઞા ક્રમાત્ ।
ગ્રન્થૈઃ પદ્યમહાદ્યમૌલિભિદુરૈર્વેદાન્તસારાતિગૈઃ
શબ્દૈસ્સુન્દરવાગ્વિલાસમધુરૈરધ્યાયવૃન્દૈશ્શિવઃ ॥ ૭૨॥

સાહસ્રૈશ્ચ શતૈસ્સહસ્રકિરણાકારરૈસ્તથા શઙ્કરો
દિગ્લોકામરબ્રહ્મવેદઋતુભિર્દિઙ્નગતસ્સઙ્ખ્યયા ।
મદ્વક્ત્રામલનીલનીરજસમં નેત્રક્રમં શઙ્કર-
સ્યાસ્યાક્ષિક્રમશોસુનિક્રમમયો દેવ્યૈ શિવેનાકથિ ॥ ૭૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે શિવરહસ્યદ્વાદશાંશાન્ પાઠમહિમા ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૧૧ - જૈગીષવ્યસ્કન્દસંવાદે દ્વાદશાંશસઙ્ખ્યાકથનમ્ । ૬૫-૭૩॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 11 - jaigIShavyaskandasaMvAde dvAdashAMshasankhyAkathanam . 65-73..

Notes:
Skanda સ્કન્દ advises Jaigīṣavya જૈગીષવ્ય about the merits of reading/studying the Text of the Śiva-Rahasyam શિવરહસ્યમ્ that comprises of Twelve Sections - Dvādaśāṁśa દ્વાદશાંશ. He informs him about the Dvādaśāṁśa દ્વાદશાંશ being named sequentially as Māheśaḥ માહેશઃ, Bhavaḥ ભવઃ, Haraḥ હરઃ, Śivaḥ શિવઃ, Bhargaḥ ભર્ગઃ, Śaṅkaraḥ શઙ્કરઃ, Ugraḥ ઉગ્રઃ, Bhīmaḥ ભીમઃ, Sadāśivaḥ સદાશિવઃ, Īśvara ઈશ્વર, Mahādevaḥ મહાદેવઃ and Īśaḥ ઈશઃ.

Encoded and proofread by Ruma Dewan

*Shivarahasyadvadashamshan Pathamahima*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*